नीतिवेदिनां नीतिशास्त्रज्ञानां क्षयादिभिस्त्रिवर्गः। अन्येषान्तु धर्म्मकामार्थैः पूर्व्वमुक्तः। अष्टवर्गस्यापचयः क्षयः। तस्यैवोपचयो वृद्धिः। तस्य नोपचयो नापापचयः स्थानम्। अष्टवर्गो यथा,—

"कृषिर्व्वणिक्पथो दुर्गं सेतुकुञ्जरबन्धनम्।
कन्याकरबलादानं सैन्यानाञ्च निवेशनम्॥
अष्टवर्गः स्मृतो राज्ञामिति——————॥"
इति भरतः॥ * ॥

सादृश्यम्। अवकाशः। स्थितिः। इति मेदिनी। (यथा, मनुः। ६। २२।

"स्थानासनाभ्यां विहरेत् सवनेषूपयन्नपः॥")

सन्निवेशः। इति हेमचन्द्रः॥ वसतिः। इति चतुर्थकाण्डे हेमचन्द्रः॥ यथाह कश्चित्।

"स्थानं प्रधानं न बलं प्रधानं
स्थानस्थितः कापुरुषोऽपि सिंहः॥")

ग्रन्थसन्धिः। इति त्रिकाण्डशेषः॥ भाजनम्। इति हलायुधः॥ निकटम्। यथा,—

"त्वमत्र कृत्तिकास्थाने कथयामासुरीश्वर।
सर्व्वे धर्म्मादयो देवा धर्म्माधर्म्मस्य साक्षिणः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे। १५।१६॥

अपि च।

"एते ह्यपत्यास्तस्यैव धारयन्ति चराचरम्।
पुरा मङ्कनकः सिद्धस्तत्स्थाने इति मे श्रुतम्॥"
इति वामने ३० अध्यायः॥*॥

स्वधर्म्मानुष्ठायिनां असम्यग्वर्त्तिनाञ्च स्थानविशेषप्राप्तिर्यथा,—

"वर्णानामाश्रमाणाञ्च सम्यग्धर्म्मानुपालिनाम्
असम्यग्वर्त्तिनां लोकान् ब्रह्मा चक्रे यथा च यत्
प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम्
क्षत्त्रियाणां तथा चैन्द्रं संग्रामेष्वनुवर्त्तिनाम्॥
वैश्यानां मारुतं स्थानं स्वधर्म्ममनुवर्त्तिनाम्।
गान्धर्व्वं शूद्रजातीनां परिचर्य्यानुकारिणाम्॥
अष्टाशीतिसहस्राणां यतीनामूर्द्ध्वरेतसाम्।
स्मृतं तेषान्तु यत् स्थानं तदेव गुरुवासिनाम्॥
सप्तर्षीणाञ्च यत् स्थाणं स्मृतं तद्वत् वनौकसाम्।
प्राजापत्यं गृहस्थानां गृहधर्म्मानुवर्त्तिनाम्॥
न्यासिनान्तु परं ब्रह्म योगिनाममृतं स्मृतम्।
एकान्तवासिनां ब्रह्मध्यायिनां परमं पदम्॥
तामिस्रमन्धतामिस्रं महारौरवरौरवम्।
असिपत्रवनं घोरं कालसूत्रमवीचिमत्॥
वेदस्य निन्दकानान्तु यज्ञव्याघातकारिणाम्।
स्थानमेतत्समाख्यातं स्वधर्म्मविनिवर्त्तिनाम्॥"
इति वह्निपुराणे सर्गकथननामाध्यायः॥

स्थानकं, क्ली, (स्थानमिव। कन्। स्थाने कं जलं यत्रेति वा।) आलवालम्। इति हेमचन्द्रः॥ नगरम्। फेनम्। इति केचित्॥ (स्थानमेव। स्वार्थे कन्। स्थानशब्दार्थोऽप्यत्र। यथा, महाभारते। १३। २६। ८४।

"तत् स्थानकं ब्राह्ममभीप्समाने-
र्गङ्गा सदैवात्मवशैरुपास्या॥")

स्थानचञ्चला, स्त्री, (स्थाने चञ्चला।) वर्व्वरीहक्षः इति शब्दचन्द्रिका॥

स्थानच्युतः, त्रि, (स्थानात् च्युतः।) स्थानभ्रष्टः। यथा, गारुड़े ११। ७१।

"स्थानस्थितस्य पद्मस्य मित्रौ वरुणभास्करौ।
स्थानच्युतस्य तस्यैव क्लेदशोषणकारकौ॥"

स्थानपालः, पुं, स्थानं पालयति यः। (स्थान+पालि+अण।) स्थानरक्षकः। (यथा, याज्ञवल्क्ये। २। १७६।

"शौल्किकैः स्थानपालैर्व्वा नष्टापहृतमाहृतम्
अर्व्वाक् संवत्सरात् स्वामी हरेत परतो नृपः॥")

स्थानभ्रष्टः, त्रि, (स्थानात् भ्रष्टः।) पदच्युतः। यथा,—

"स्थानस्थितानि पूज्यन्ते पूज्यन्ते च पदस्थिताः
स्थानभ्रष्टा न पूज्यन्ते केशा दन्ता नखा नराः॥
इति गारुड़े। ११५। ७३।

स्थानाध्यक्षः, पुं, (स्थानस्य अध्यक्षः।) स्थानरक्षकः। तत्पर्य्यायः। स्थानिकः २। इति हेमचन्द्रः॥

स्थानिकः, पुं, (स्थानमस्येति। ठन्।) स्थानाध्यक्षः। इति हेमचन्द्रः॥

स्थानी, [न्] त्रि, स्थानविशिष्टः। स्थानं विद्यतेऽस्य इत्यर्थे इन्प्रत्ययेन निष्पन्नः। यथा, स्थानिवदादेशः। इति मुग्धबोधव्याकरणम्॥

स्थानीयं, क्ली, (स्थानाय हितमिति। स्थान+छः) नगरम्। इत्यमरः। २। २। १॥ स्थानसम्बन्धिनि, त्रि॥

स्थाने, व्य, योग्यम्। (यथा, रघुः। ५। १६।

"स्थाने भवानेकनराधिपः स-
न्नकिञ्चनत्वं मखजं व्यनक्ति॥")

कारणार्थः। सादृश्यम्। सत्यम्। इति शब्दरत्नावली॥

स्थापकः, त्रि, (स्थापयतीति। स्था+णिच्+ण्वुल्।) स्थापनकर्त्ता। ञ्यन्तस्थाधातोर्णकप्रत्ययेन निष्पन्नः॥

स्थापत्यः, पुं, (स्थपतिरेव। स्थपति+ष्यञ्।) अन्तःपुररक्षकः। इत्यमरः। २।८।८॥ स्थपतेर्भावे, क्ली॥

स्थापनं क्ली, (स्था+णिच्+ल्युट्।) रोपणम्। पुंसवनम्। इति मेदिनी॥ समाधिः। इति विश्वः॥ (पादादिपिण्डीकरणम्। इति श्रीधरस्वामी॥ यथा, भागवते। १०। ४४। ५।

"उत्थापनैरुन्नयनैश्चालनैः स्थापनैरपि।
परस्परं जिगीषन्तावपचक्रतुरात्मनः॥")

स्थापना, स्त्री, (स्था+णिच्+युच्+टाप्।) स्थापनम् निवेशनम्। (यथा, महाभारते। १२। २८१। २४।

"स्थापना वै सुमहती त्वया देव प्रवर्त्तिता॥")

विचाराङ्गविशेषः। तद्यथा,—

"अथ स्थापना। स्थापना नाम तस्या एव प्रतिज्ञाया हेतुभिर्दृष्टान्तोपनयनिगमैः स्थापना पूर्व्वं हि प्रतिज्ञा पश्चात् स्थापना किंह्यप्रतिज्ञातं स्थापयिष्यति यथा नित्यः पुरुष इति प्रतिज्ञा हेतुरकृतकत्वात् इति। दृष्टान्तः यथा, अकृतकमाकाशं तच्च नित्यम्। उपनयो यथा, चाकृतकमाकाशन्तथा पुरुषः। निगमनन्तस्मान्नित्यइति।" इति चरके विमानस्थाने ८ अध्याये॥

स्थापनी, स्त्री, (स्थाप्यतेऽनयेति। स्था+णिच्+ल्युट्। ङीप्।) पाठा। इति मेदिनी अमरश्च। २। ४। ८४॥

स्थापितं, त्रि, (स्था+णिच्+क्तः।) निश्चितम्। न्यस्तम्। इति मेदिनी॥ (यथा, देवीभागवते। २। ८। ४३।

"मणिमन्त्रधराः शूराः स्थापितास्तत्र रक्षणे॥")

स्थाम, [न्] क्ली, (तिष्ठत्यनेनेति। स्था+ "सर्व्वधातुभ्यो मनिन्।" उणा० ४। १४४। इति मनिन्।) सामर्थ्यम्। इत्यमरः। २। ८। १०२॥ (नादः। यथा, महाभारते। १। १३१। २४।

"अश्वस्येवास्य यत् स्थाम नदतः प्रदिशो गतम्।
अश्वत्थामैव बालोऽयं तस्मान्नाम्ना भविष्यति॥")

स्थायिभावः, पुं, (स्थायी भावः।) रसस्य त्रिधाभावान्तर्गतभावविशेषः। यथा,—

"सञ्चारिणः प्रधानानि देवादिविषया रतिः।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते॥
न भावहीनोऽस्ति रसो न भावो रसवर्ज्जितः।
परस्परकृता सिद्धिरनयो रसभावयोः॥"

इत्युक्तदिशा परमालोचनया परमविश्रान्तिस्थानेन रसेन सहैव वर्त्तमाना अपि राजानुगतविवाहप्रवृत्तभृत्यवत् आपाततो यत्र प्राधान्येनाभिव्यक्ता व्यभिचारिणः देवमुनिगुरुनृपादिविषया रतिः उद्बुद्धमात्राविभवादिभिरपरिपुष्टतया रसतामनापाद्यमानाश्च स्थायिनो भावा भावशब्दवाच्याः। उद्बुद्धमात्रस्थायीभावो यथा,—

"हरस्तु किञ्चित् परिवृत्तधैर्य्य-
श्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे विम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि॥"

अत्र पार्व्वतीविषया भगवतो रतिः। इति साहित्यदर्पणे रसभावादिनिरूपणो नाम ३ परिच्छेदः॥

स्थायी, [न्] पुं, (तिष्ठतीति। स्था+णिनिः।) भावभेदः। यथा,—

"स्थायिसात्त्विकसञ्चारिप्रभेदैः स्याद्रतिः पुनः॥"
इति हेमचन्द्रः॥

(यथा, साहित्यदर्पणे। ३। २०५—२०७।

"अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः।
आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः॥
यदुक्तम्।
सक्सूत्रवृत्त्या भावानामन्येषामनुगामुकः।
न तिरोधीयते स्थायी तैरसौ पुष्यते परम्॥
तद्भेदानाह।
रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च॥